# COOCH BEHAR PANCHANAN BARMA UNIVERSITY

B.A. Honours 2nd Semester Examination, 2019

## SANSKRIT

## CLASSICAL SANSKRIT LITERATURE (DRAMA AND CHHANDA)

## CORE-3 (CCSANH3)

Time Allotted: 2 Hours | Full Marks: 40

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

### Unit-I

1. कस्यापि एकस्य उत्तरं प्रदेयम् – 15×1 = 15

(क) अभिज्ञानशकुन्तलानुसारम् अनसूया–प्रियंवदयोः चरित्रयोः तुलनात्मकम् आलोचनं क्रियताम्।

(ख) अभिज्ञानशकुन्तलं नाटके हंसपदिकायाः गीतस्य तात्पर्यमालोच्यताम्।

2. सरलसंस्कृतभाषया एकस्य व्याख्या कार्या। (देवनागरीलिप्या लेखनीयम्) 6×1 = 6

(क) गच्छति पुरः शरीरं धावति पश्चादसंस्तुतं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य॥

(ख) आ परितोषाद्विदुषां न साधुमन्ये प्रयोगविज्ञानम्।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥

(ग) अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा॥

3. मातृभाषया आङ्गलभाषया वा अनुवादः कार्यः। (एकस्य) 4×1 = 4

(क) सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥

(ख) पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
ना दत्ते प्रियमण्डलापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥

Digitized by Krishanu Chakraborty, Asst. Librarian, Cooch Behar College

4. अधोलिखितेषु प्रश्नानामुत्तरं सरललसंस्कृतेन देवनागरीलिप्या प्रदेयम्। 1×5 = 5

(क) अभिज्ञानशकुन्तले विदूषकस्य नाम किम् ?

(ख) अभिज्ञानशकुन्तलं नाटकस्य प्रसिद्धः टीकाकारः कः ?

(ग) ऋषेः कण्वस्य आश्रमः कुत्रासीत् ?

(घ) शकुन्तलायाः मातुः पितुश्च नाम किम् ?

(ङ) का आसीत् गौतमी ?

(च) अभिज्ञानशकुन्तलम् इति नाटकस्य भरतवाक्ये कस्य देवस्य स्तुतिरस्ति ?

(छ) पङ्क्तिः पूरणीया –

भवन्ति नम्रास्तरवः फलागमै

........................................ ।

(ज) पङ्क्तिः पूरणीया –

मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः

................................................................ ॥

## Unit-II

5. अधःस्थितेषु प्रश्नानाम् उत्तरं सरलसंस्कृतेन देवनागरीलिप्या प्रदेयम् – 1×5 = 5

(क) किं नाम पद्यम् ?

(ख) छन्दोमञ्जरीम् अतिरिच्य छन्दःशास्त्रस्य अन्याः रचनाः काः ?

(ग) कस्मिन् गणे सर्वो लघुः ?

(घ) रगणे कः गुरुः ?

(ङ) मन्दाक्रान्ता वृत्तस्य किं लक्षणम् ?

(च) पद्यं कतिविधम् ?

(छ) इन्द्रवज्रा छन्दसः किं लक्षणम् ?

6. अधोलिखितेषु छन्दःसु कस्यापि एकस्य संस्कृतभाषया देवनागरीलिप्या सोदाहरणं संज्ञानिर्देशं कुरुत। 3×1 = 3

वंशस्थविलम्; शालिनी; रुचिरा; द्रुतविलम्बितम्।

7. अधोलिखितेषु एकस्य संस्कृतभाषया देवनागरीलिप्या गणपूर्वकं छन्दोनिर्णयं कुरुत। 2×1 = 2

(क) न खलु न खलु बाणः सन्निपात्योयमस्मिन्।

(ख) कश्चित्कान्ता विरहगुरुणा स्वाधिकारात्प्रमत्तः।

(ग) इदं किलाव्याजमनोहरं वपुः।

19.6.19
12-2

——×——



Digitized by Krishanu Chakraborty, Asst. Librarian, Cooch Behar College

# COOCH BEHAR PANCHANAN BARMA UNIVERSITY

B.A. Honours 2nd Semester Examination, 2019

## SANSKRIT

## CLASSICAL SANSKRIT LITERATURE (POETRY) AND DRAMATURGY

## CORE-4 (CCSANH4)

Time Allotted: 2 Hours

Full Marks: 40

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

### Unit-I

1. संस्कृतभाषया एकस्य उत्तरं प्रदेयम् (देवनागरीलिप्यां लेखनीयम्) – 10

(क) 'जटाधरः सन् जुहुधीह पावकम्'– कस्योक्तिरियम् ? किरातार्जुनीयस्य प्रथमसर्गमवलम्ब्य वक्तुश्चारित्रिकं वैशिष्ट्यं राजनीतिज्ञानं च संस्कृतभाषया आलोचनीयम्।

(ख) 'भारवेरर्थगौरवम्'– इति वचनस्य याथार्थ्यं प्रतिपादनीयम्।

2. संस्कृतभाषया देवनागरीलिप्यां च कस्याचिदेकस्य व्याख्या कार्या – 5×1 = 5

(क) स किंसखा साधु न शास्ति योऽधिपं
हिताभ्र यः संशृणुते स किंप्रभुः।
सदानुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसम्पदः॥

(ख) प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः।
स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता॥

3. संस्कृतभाषया देवनागरीलिप्यां च पञ्चानां प्रश्नानाम् उत्तरं प्रदेयम्। 1×5 = 5

(क) वनेचरः कीदृशीं वाचम् उवाच ?

(ख) के अरिषड्वर्गाः ?

(ग) किरातार्जुनीयमहाकाव्यस्य प्रसिद्धः टीकाकारः कः ?

(घ) किंसखा शब्दस्य का व्युत्पत्तिः ?

(ङ) 'स वर्णिलिङ्गी विदितः समाययौ'– अत्र 'वर्णिलिङ्गी' शब्दस्य कः अर्थः ?

(च) किरातार्जुनीयमहाकाव्यस्य प्रथमसर्गस्य अन्तिमश्लोकः केन छन्दसा विरचितः ?

(छ) कीदृशाः देशाः अदेवमातृकाः ?

(ज) भूपतीनां चरितं कीदृशं जन्तूनां वा कीदृशम् ?

अथवा



Digitized by Krishanu Chakraborty, Asst. Librarian, Cooch Behar College

कस्यचिदेकस्य श्लोकस्य पादपूरणं कर्तव्यम्। 5×1 = 5

(क) न विव्यथे तस्य ..............................

प्रवक्तुमिच्छन्ति ..............................॥

(ख) दूरोदरच्छन्मजितां समीहते

..........................................॥

## Unit-II

4. कस्यचिद् एकस्य प्रश्नस्य उत्तरं प्रदेयम्– 10×1 = 10

(क) का अर्थप्रकृतिः ? कतिविधा सा ? भेदद्वयं सोदाहरणं व्याख्येयम्।

(ख) को नाम अर्थोपक्षेपकः ? तस्य भेदान् उल्लिख्य संक्षेपेण तेषां स्वरूपम् आलोचनीयम्।

(ग) कः सन्धिः ? कतिविधः सः ? तस्य भेदद्वयमाश्रित्य एकः संक्षिप्तनिबन्धः विरचनीयः।

5. कस्यचिदेकस्य टिप्पणी कार्या– 5

भाणः, प्रकरी, नान्दी, विष्कम्भकः।

6. सरलसुरगिरा पञ्चानां प्रश्नानामुत्तरं कार्यम् : 1×5 = 5

(क) कः अभिनयः ?

(ख) कः पूर्वरङ्गः ?

(ग) सौगन्धिकाहरणं कीदृशं रूपकम् ?

(घ) नाटकस्य अङ्कसंख्याविषये साहित्यदर्पणकारस्य किं मतम् ?

(ङ) किं खलु श्रव्यकाव्यम् ? तत् कतिविधम् ?

(च) का नाम प्रस्तावना ?

(छ) वृत्तिः कतिविधा ?

——×——





Digitized by Krishanu Chakraborty, Asst. Librarian, Cooch Behar College

कस्यचिदेकस्य श्लोकस्य पादपूरणं कर्तव्यम्। 5×1 = 5

(क) न विव्यथे तस्य ..............................

प्रवक्तुमिच्छन्ति ............................॥

(ख) दूरोदरच्छन्नजितां समीहते

..........................................॥

## Unit-II

4. कस्यचिद् एकस्य प्रश्नस्य उत्तरं प्रदेयम्– 10×1 = 10

(क) का अर्थप्रकृतिः ? कतिविधा सा ? भेदद्वयं सोदाहरणं व्याख्येयम्।

(ख) को नाम अर्थोपक्षेपकः ? तस्य भेदान् उल्लिख्य संक्षेपेण तेषां स्वरूपम् आलोचनीयम्।

(ग) कः सन्धिः ? कतिविधः सः ? तस्य भेदद्वयमाश्रित्य एकः संक्षिप्तनिबन्धः विरचनीयः।

5. कस्यचिदेकस्य टिप्पणी कार्या– 5

भाणः, प्रकरी, नान्दी, विष्कम्भकः।

6. सरलसुरगिरा पञ्चानां प्रश्नानामुत्तरं कार्यम् : 1×5 = 5

(क) कः अभिनयः ?

(ख) कः पूर्वरङ्गः ?

(ग) सौगन्धिकाहरणं कीदृशं रूपकम् ?

(घ) नाटकस्य अङ्कसंख्याविषये साहित्यदर्पणकारस्य किं मतम् ?

(ङ) किं खलु श्रव्यकाव्यम् ? तत् कतिविधम् ?

(च) का नाम प्रस्तावना ?

(छ) वृत्तिः कतिविधा ?

——×——



Digitized by Krishanu Chakraborty, Asst. Librarian, Cooch Behar College